संस्कृत-प्रश्ना

—— :;o:: ——

पण्डित—वासुदेव—विरचितः

श्रीयुत पण्डित हरप्रसादशर्म्मणः (वकील) पद-
स्थायिन आज्ञानुसारम्

(मेरठ) स्वामियन्त्रालये

सामवेदभाष्यकारस्य वेदप्रकाशसंपादकस्य
तुलसीराम स्वामिनः प्रबन्धेन मुद्रापितः

—— :*o*: ——

फ़र्वरी ११ ई०

प्रथम वारम् ५००

मूल्यम् -)

ओ३म्

अथ संस्कृत-प्रवेशः

ब्राह्मणबालकयोः

1 अर्भकैः बालकैः । 4 बोधो ज्ञानम् ।
2 कुलजीविकाम् । 5 अमुञ्चत् अत्यजत् ।
3 श्रुत्वा 6 विद्वांसौ पण्डितौ ।

कस्मिंश्चिन्नगरे विद्यासागरनामा ब्राह्मण आसीत् । तस्य च एकोविधुभूषणः द्वितीयश्च शशिभूषणः द्वावेव निजमातुर्गर्भादेकदा जायमानौ बालकौ भवतः तौ समानावस्थैः (1) अर्भकैः परस्परं क्रीडन्तौ समयं गमयाञ्चक्रतुः । निजहास्यमधुरभाषणैश्च मातृपित्रोरानन्ददायकौ आस्ताम् । एवं गच्छति काले तौ च विद्याऽध्ययनयोग्यौ जातौ । तदा च तयोः पित्रा सुन्दरतिथिनक्षत्रसंयुक्तं दिनं विचार्य तौ सुतौ प्रति विद्यासागरेण उक्तम् । हे शुभलक्षणसंयुक्तौ विधुभूषणशशिभूषणौ! अधुना युवां विद्याऽध्ययनशक्तौ जातौ । तदद्य निज (2) कुलपोषिणीं विद्यां पठतम् । इत्थं पितुर्वाणीं श्रुत्वा पूर्वं विधुभूषण उवाच । भो पितः! मम इच्छा तु वेदपठने भवति ।

तत्पश्चाच्छशिभूषणोऽवदत्। मम तु यथाशीघ्रं संस्कृतज्ञानं भवतु तथैवास्ति। स एवं तयोर्बालकयोर्वचनं समाकर्ण्य (३) निजमनसि अशोचत्। किं किं कस्मै कस्मै पाठयम् इति। एवं विचिन्त्य निश्चितवान् आभ्यां प्रथमं व्याकरणम् पठनीयम्। येन शीघ्रं हि संस्कृतबोधो (४) भविष्यति इत्थं विचार्य तौ बालकौ गुरुं समर्पयामास। अथ तौ प्रतिदिनं प्रातः प्रातरुत्थाय अध्ययनार्थं पाठशालायाम् अगमिष्यताम्। एवं गच्छति समये एकस्मिन्दिवसे स्वपिति शशिभूषणे सूर्य उदितः। मात्रा जागरितोऽपि न निद्राम् अमुञ्चत् (५) एतदन्तरेणैव अन्ये तत्पाठशालायां पठनवन्तोबालकास्तम् आहूयनार्थं गुरुणा प्रेषिताः। तैः परस्परं बलादाकृष्यमाणः शशिभूषणः पाठशालायां गतः गुरुणा संताडितश्च। भोःशशिभूषण! एतदालस्येन विद्यायाः संचयो न भवति। तद्यदि एवं पुनरागमिष्यसि तु एतद्दिनादप्यधिकं दण्डं प्राप्स्यसि। शशिभूषणोऽपि तावदारभ्य भानूदयात्प्रागेव उत्थाय शौचादिक्रियां कृत्वा पठनार्थमगमिष्यत्। अथ कियत्कालेन विधुभूषणशशिभूषणौ विद्वांसौ (६) जातौ। उक्तं हि—

गुरूपदेशं यो ध्यात्वा वारं वारं विचार्य च।
यत्करोति नरः कर्मसाफल्याय जयाय च ।१।

—*—

ब्राह्मणकाष्ठविक्रयकयोः

१ अविद्यः विद्याहीनः । ६ अन्वधावत् अनुअगच्छत् ।
२ असत्कृतः आदरहीनः । ७स्फुटमस्तकः विदारितशिराः।
३ अलङ्कृतं शोभितम् । ८ अवाप जगाम ।
४ प्राणयात्रा जीवननिर्वाहः। ९ अजातव्रणः व्रणरहितः ।
५ प्राणत्राणं जीवरक्षाम् ।

अथैकस्मिन् ग्रामे गुरुदत्तशर्मा नाम ब्राह्मणः प्रतिवसतिस्म । सोऽविद्योनिर्धनश्च आसीत् । ग्रामवासिभिर् असत्कृतः (२) येन केन प्रकारेण आजीविकाम् अकरोत् । तेन एकदा विचारितम् । अहोअस्मद्भागवतादिग्रन्थेषु लिखितं तपःकरणेन प्रसन्ना देवा वरं ददति। अतो मया ऽपि वने गत्वा कश्चिद्देवः प्रसादनीयः । इत्थं विचार्य वनं गच्छति ब्राह्मणे मार्गे कश्चित्काष्ठविक्रयकोमिलितः । तेन ब्राह्मणेन सह मित्रता कृता । उक्तं च-भोः काष्ठविक्रयक ! आवयोर् अधुना मित्रता जाता तद्वने सुखेन वत्स्या-

वः । त्वं मदीयम् अहं त्वदीयम् सहायं करिष्यामि इत्थं मिथोविचिन्त्य तौ सुघासैः सुवृक्षैः सहकारकदम्बार्जुनादिभिरलङ्कृतं (३) शुकसारिकादिपक्षिविशेषैरभिशब्दायमानं च, सुवापितड़ागैरुपशोभितं च, तपोऽभिलाषिनां नयनाऽऽनन्दजनकं च वनं जग्मतुः । तत्र गत्वा गुरुदत्तशर्मा तु तपसि लग्नः कन्दमूलफलाहारैश्च प्राणयात्रा (४) मकरोत् । काष्ठविक्रयकश्च वनात् सुशुष्ककाष्ठभारमानीय निकटवर्त्तिनगरेषु काष्ठविक्रयं कृत्वा, तन्मौल्येनान्नादिकं गृहीत्वा वने निवसन् तपस्तपन्तं गुरुदत्तं सेवमानोदिनानि व्यतीयाय । एकस्मिन्दिने तपस्तपति गुरुदत्ते तस्य कुटीनिकटे दैववशात् कुतश्चित्सिंहः समागतः । तं विलोक्य गुरुदत्तशर्मा निजमित्रमुवाच । भोमित्र ! अयं वनजीवशत्रुः उद्धतस्कन्धः प्रसारितकेशरश्च बुभुक्षित इव कुतश्चित्समायातः । तदस्मात्केनचित्प्रकारेण प्राणत्राणं (५) कुर्वः । एवं वदति गुरुदत्ते केशरी बलात् उपेत्य तम् उत्थाप्य सघनं वनं विवेश । काष्ठविक्रयकोऽपि कुठारहस्तस्तमन्वधावत् (६) । गत्वा च सिंहमस्तकेऽतितीक्ष्णधारः कुठारः प्रहृतः । सिंहश्च स्फुट-

(७)मस्तकोमृत्युमवाप(८)। तदनन्तरम् अजातव्रणोगुरुदत्त-शर्मोऽपि काष्ठविक्रयकोऽपि वने निवसन्तौ कालक्षेपं चक्रतुः

नैकः प्रपद्येताध्वानम् सुखमिच्छन् हि मानवः।

——:*०*:——

व्याधकच्छपयोः

अर्द्धादर्द्धं हि गृह्णीयाद्यन्मिलेत्सुखपूर्वकम्।
अर्द्धं त्यजन् लोभवशात् व्याधवच्छोकमाप्नुयात्।

१ अनुदिनं प्रतिवारम्। ५ अंगीचकार इत्थंकरोमि
२ पुरोभवति अग्रेभवति। इत्यमन्यत।
३ निस्सृत्य बहिरागत्य। ६ कूर्म्मे कच्छपे।
४ नयनगोचरः प्रत्यक्षः। ७ मरालोहंसः।

कस्मिंश्चिन्नगरे एकोव्याधः प्रतिवसतिस्म। स इत-स्ततोऽनुदिनं(१) तडागनदीप्रभृतिभ्यो मत्स्यादीन् समा-हृत्य उत वनचरान् मृगशशकादीन् शुकसारिकाखंज-रीटादीन् वा समानीय तेषां मौल्येन भक्षणेन वा निज-कुटुम्बपालनां चकार। एकस्मिन्दिने भ्रमन् जीवादीन् अभिलषन् न क्वाऽपि कश्चिज्जीवं प्राप्तवान्। ततः स

कस्यचित्तडागस्य तीरे तिष्ठन् व्यचिन्तयत्। अहो न जाने अद्य प्रातःकाले उत्थाय कस्य दुर्भाग्यस्य दर्शनं जातं, यत् तस्य फलमिदं (२)पुरोभवति। एवं विचिन्तयति तस्मिन्नेकोहंसः समागत्य तडागतीरेऽतिष्ठत्। व्याधोऽपि तं हंसं विलोक्य आनन्दं जगाम। अवदच्च। "सर्वत्र भागी लभते हि भाग्यम्" अहो दयालुना ईश्वरेण हंस एव मत्परिवारक्षुधानिवारणाय प्रेषितः। तदस्योपरि जालं प्रसार्य इमं बद्ध्वा गृहं नेष्यामि। नीत्वा च बालकान् दर्शयिष्यामि कथयिष्यामि च। रे बालकाः! एष हंसोऽस्ति अद्य पर्यन्तं न कदाऽपि एतादृशः पक्षी दृष्टोभवद्भिः न मयाऽऽनीतश्च। इति विचार्य जालं क्षिप्त्वा हंसोबद्धः। तदैव कश्चित्कच्छपोमुखे मणिं गृहीत्वा धर्मसेवनार्थं तडागान्निस्सृत्य (३) तटे उपविष्टः। तस्य व्याधोऽपि नयनगोचरो (४) जातश्च। हंसहस्तं व्याधं कच्छप उवाच—भोव्याध! त्वम् इमं पक्षिदीनं हंसं मुञ्च। एतत्प्रतीकारम् इमं मणिं गृहाण। येन ते जीवनपर्यन्तं परिवाहोभविष्यति। इत्थं श्रुत्वा व्याधोऽप्यङ्गीचकार (५) अकथयत् च। भो देहि मणिं तव मित्रं हंसं मुञ्चामि परं पूर्वं मणिं देहि पश्चात् त्य-

जामि। तथा कृते कूर्मे (६) व्याधस्तं मणिं गृहीत्वा पुनः कच्छपमुवाच। जलचर! एतत्सहोदरमणिमन्यं देहि तदा मुञ्चामि। नोचेत् मणिं हंसं च गृहं नेष्यामि। इत्थं श्रुत्वा कच्छपोविचचार। हंहो बहूनर्थतरोजातः। यदस्मै दुष्टाय मणिर्दत्तः पूर्वं मरालो (७) न मोचयितः। एवं विचार्य कच्छपः प्रोवाच। भोमित्र! सत्यमुक्तं भवता देहि मणिं यदनेन सार्द्धं द्वितीयं मणिं समानेष्यामि।

इत्थं व्याधो द्वितीयमणिमिलनोत्साहेन मणिं कच्छपाय ददौ। कच्छपोमणिं लब्ध्वा उवाच। भोमित्र! यावदहं द्वितीयं मणिं तडागतलात् आनयामि। तावत् त्वम् इमं हंसं मुञ्च। नोचेत्मणिद्वयं न दास्यामि। इति कथयित्वा कूर्मोजले निमग्नः। तेन मणिद्वयलोभचित्तेन व्याधेन हंसोमुक्तः। जलस्थेनैव कच्छपेन मुक्तोहंसो दृष्टः। तदा निर्विघ्नमनाः कच्छपः जलाद् उद्धृतग्रीवोव्याधमुवाच। भो! गच्छ गृहम्॥

(शठं प्रति शाठ्यं कुर्यात्)

——:*०*:——

वकमरालयोः

१ श्लाघावचः यशोवाणीः इति
२ सत्वरं ब्रूहि शीघ्रं कथय
३ संसर्गेण संमिलनेन ।
४ कुलायो गृहम् ।
५ विकसित प्रफुल्लित ।
६ आह्लाद आनन्दः ।
७ साम्प्रतम् अद्य ।
८ अद्मि भक्षयामि ।
९ कर्णाकृतं श्रुतम् ।

कस्यचित् सरोवरस्य तटे कृतमन्दिरो वक आसीत् । स प्रतिदिनं तस्मादेव सरोवरात् मत्स्यान् समाहृत्य उदरपूरणं कृतवान् । एवं कुर्वतस्तस्य कियान्कालोव्यतीतः । अथ कदाचित् आकाशमार्गेण गच्छता हंसेन प्रफुल्लितकमलः सरोवरो दृष्टः । स च तद्दर्शनोत्सुकः तत्तीरे समागतः । आगत्य च सरस्तीरे व्यास्तव्यतया मत्स्यसंहरणाय एकचरणेन स्थितं तपस्तपन्तमिव वकं ददर्श । हंस उवाच । भोः कस्त्वं पक्षिविशेषः तपश्चारी । अद्यावधि तु मया कोऽपि न पक्षी तपश्चरन् दृष्टः । अधुनैव ज्ञातं यत् अस्मत्कुलेऽपि तपश्चारिणः सन्ति । तर्हि प्रसन्नीभूतेन ईश्वरेण भवद्दर्शनात्कृतार्थीकर्तुं मामत्र प्रेषितः । धन्योहं भवद्दर्शनेन । एवं स्वात्म (१) श्लाघावचः

श्रुत्वा बको न उवाच। पूर्वस्मादपि दृढतरं समाधिं चकार। पुनः मरालोऽवदत्। भो भ्रातर् यदि एताहृशी मतिस्ते भगवद्ध्याने भवति तत्तु समीचीनं। परम् अहं तु भवद्गेहेऽतिथित्वेन प्राप्तः। तत् कञ्चित्कालं मत्तः वार्तां कृत्वा पुनर्ध्यानपरायणोभव। एवं श्रुत्वा तु बकेन नयने उद्घात्य दृष्टः कश्चित् हंसस्तिष्ठति। तं प्रेक्ष्य वक उवाच भोःकस्त्वं कस्मादागतः कस्य सरसस्तीरे वससि किं नाम च ते किमर्थमागतः। सत्वरं ब्रूहि (२) यतस्तवातिथ्यं करोमि। हंसेनोक्तं, भोमित्र! हंसनामा पक्षी अहं पृथिवीतलविख्यातकीर्त्तिः। यस्य चञ्चुसंसर्गेण (३) दुग्धपानीययोः पृथक्करणं भवति। भो अद्याहं मानससरोवरात् आगच्छामि। यत्र बहुरङ्गा मुक्ता लुठन्ति। यमाश्रित्य सुखं प्राप्नुवन्ति। यं दृष्ट्वाऽन्यसरोवरदर्शनेच्छा मनसि न उत्तिष्ठते। तस्मादायामि। तस्यैव तटे वटवृक्षशाखायां मम (४) कुलायोऽस्ति। निजनाम च पूर्वमुक्तमेव। भूमिविलोकनौत्सुक्येन भ्रमामि। अत्र विकसित (५)मनोहरकमलं ते सरो मया दृष्टं तन्मनसि आह्लादो (६) जातः। एतद्दर्शनार्थमहमागतः। अद्य गच्छामि अलं तवाति-

च्यसत्कारेण। बकेनोक्तं मम प्रवृत्तिस्तु (७) साम्प्रतम् ऋषिप्रवृत्तिरिव भवति। तत्केनाऽहं तवातिथ्यं कुर्याम्। अहं तु प्रातरारभ्य सूर्यास्तान्तम् एकेन पदेन तिष्ठन् निम्नग्रीव ईश्वराराधनं करोमि। यत्किंचिद्भोज्यं दैववशाद् आमिलति तदेव अद्मि (८)। स हंसोऽपि कदाचिद् बकानां श्रुतनामा आसीत्। तेषामेकपदेन स्थैर्यं मत्स्यानां संहरणञ्चाऽपि श्रुतम्। तत् तेन तदा स्मृतम्। अहो यद्बकानां लक्षणं मया कर्णीकृतं (९) तत्सर्वमस्य कथने सगर्भितमेवास्ति इति निश्चित्य हंसओड्डीयत॥

बुद्धिमन्तो हि पश्यन्ति छद्मिनां छद्मजं वचः।
तेषां छद्मवचोज्ञात्वा सङ्गं मुञ्चन्ति हंसवत् १

—:०:—

चतुर्णां बालानाम्।

१ भ्रातरः। अतिस्नेहाद् भ्रातरइतिवचनम्
२ सार्द्धं सह।
३ त्यागं निर्गमम्।
५ विरराम मौनीबभूव।
६ भणितं कथितम्।
७ जल्पितं उक्तम्।

४ वाढम् एवं करिष्यामि इति। ८ वसुना धनेन।

९ विश्वसेत् विश्वासं कुर्यात्।

अथैकस्मिन्नगरे ब्राह्मणक्षत्रियवैश्यशूद्राणां यथाक्रमेण चत्वारो बालका आसन्। तेषामन्योन्यं परा मैत्री चाभूत्। अथैकस्मिन् दिने चतुर्भिर्मिलित्वा चिन्तितम् अहो मित्राणि अस्माभिः कश्चित्सुखसाधनोपायो न कृतः। तर्हि इदानीं चत्वारो भ्रातरो (१) मिलित्वा देशान्तरं गत्वा कञ्चित्सुखसाधनोपायं विधास्यामः। रात्रौ एतन्मतं मन्त्रितं तैः। तत्र दैववशात् कश्चिच्छली तेषां परदेशगमनविधायकं तद्वचः श्रुतवान्। तेन विचारितम् अहो इमे चत्वारो धनोपार्ज्जनाय परदेशं गमिष्यन्ति। अहमपि एतेषु भृत्यभावेन पञ्चमो भूत्वा एतेषां परिचर्य्यां कुर्वन् एभिरुपार्जितं द्रव्यं गृहीत्वा देशान्तरं गच्छामि वा स्वदेशमागमिष्यामि। सोऽपि एवं निश्चित्य अग्रिमे दिने चतुर्षु मित्रेषु ब्राह्मणपुत्रस्य पार्श्वे परदेशगमनप्रश्नार्थं गतः। भो अहं द्रव्यसंपादनार्थं गन्तुकामोऽस्मि तन्निर्विघ्नयात्राकरणाय सुमुहूर्तं कथय। ब्राह्मणस्तेन पृष्टं कदा गमनेच्छा वर्त्तते। तेनोक्तं भो अहम् एकाकी एवा-

ऽस्मि । परदेशगमनाद्बिभेम्यपि परं देशान्तरं द्रष्टुं मनउत्सहते अतएव सुमुहूर्तं पृच्छामि । एतद्विकल्पात्मकं मनोभवति । एतस्योपायो यद्यस्ति तदा वक्तव्यः केन साकं मदीया यात्रा भविष्यति । तच्छ्रुत्वा ब्राह्मणबालकोऽवदत् । भोस्त्यज भयम् । अहमपि निजमित्रैः सार्द्धं (२) द्रव्योत्पादनार्थं परदेशं गमिष्यामि । यदि तावकी आकांक्षा स्यात् तदा त्वयापि गन्तव्यम् । एतत्समाकर्ण्य मनसि हर्षमुद्वहन्नशोचत् । अहो ईश्वरेण कार्यपूर्तिस्तु सम्यक्तया कृता परं यदि कार्यम्भूयात् । इत्थं संचिन्त्य अवदत् । भो अहम् अपि युष्माकं सेवां कुर्वन् परदेशे कालं क्षपयामि । यत्किंचिद्भवतां साहाय्येन वित्तं मिलिष्यति तदर्द्धं युष्मभ्यं दास्यामि । इति निर्णयं कृत्वा प्रश्नभरं तदुपरि क्षिप्त्वा गृहं प्रति निवृत्तः । तैश्च साकं स्वदेशत्यागं (३) कृतवान् । तैरपि स मित्रभावेन वर्तितः । तैरितस्ततो येन केन प्रकारेण वित्तमासादितम् । अथ तेन पश्चात् चिन्तितम् । अहो ! अद्य बहुवित्तमुपार्जितम् एभिः । तदिमान् केनचित्प्रकारेण वञ्चयित्वा सर्वं धनमहं नेष्यामि। स्वस्त्रीपुत्रान् सुखं दास्यामि । इति विचा-

यं तेन कथितं हे प्रियवराः ! यदिदं वित्तमुपार्जितं भवद्भिः तद्गृहे प्रेषणीयं यतः कुटुम्बिनः क्लेशविमुक्ताः भवेयुः । तैः कथितं वाढं(४) परं मित्र । कोऽस्माकं धनं गृहे प्रापयिष्यति । एवं श्रुत्वा तेन उक्तं, भो अहं भृत्यभावेन भवद्भिः साकं किमर्थम् आगतः । यत्किञ्चित्तावकं कार्यं भवति तदहं हर्षचित्तः करिष्यामि । तेन विहाय चिन्तां मत्तः कथनीयम् । इति कथयित्वा स विरराम (५) एवं श्रुत्वा द्विजबालेन स्वप्रियैः सह संमन्त्रितं । भोप्रिया ! अयम् अस्मत्सु पञ्चमः किञ्चित्सुकथनं ब्रूते । वदति अयं भो यदिदं वित्तं भवद्भिर्बहुदिनैरुपार्जितं तद्गृहे प्रेषणीयं यतः पुत्रादयः सुखभुजः स्युः । तन्मया तु समीचीनं मन्यते युष्माकं मनसि यद्भवति तद्विधेयम् । एतच्छ्रुत्वा वणिक्पुत्रेण भणितम् (६) अहं तु गृहदानाय निजभागं न प्रयच्छामि । युष्माकं मतिः स्वाऽनुकूला । तच्छ्रुत्वा क्षत्रिय उवाच । भोः किमयं चौरोऽस्ति यतस्त्वं नाऽस्य विश्वासं कुरुषे । न इत्थं शोचनीयं । वैश्य उवाच । भो विज्ञापयतु परम् अहं कदाऽपि निजभागं न ददामि । न द्विवारं वक्तव्यं मत्तः । यदि भवतां मतिःस्यात्तदा कुत्रचित्प्रेषणाय त्रिभिरुपार्ज्जितं द्रव्यं दे-

यमस्मै । क्षत्रियेणोक्तं मा देहि भोः वयं तु दास्यामः । एवं बहुधा विमृश्य तस्य कपटभावमजानन्तस्तं स्वकीयं स्वकीयं द्रव्यं सर्वे ददुः। अकथयंश्च । भोऽस्माकं सर्वेषां गृहे नैरोग्यक्षेमं च वाच्यम् भवता । तेन जल्पितं (७) भोयुष्माकं सर्वेषां गृहे वदिष्यामि परं नाऽस्य वणिक्पुत्रस्य । तैरुक्तम् चेदिच्छा तावकी । एवं तेषां सर्वस्वं धनं संगृह्य गृहं प्रतिनिवृत्तः । मार्गे आगत्य तेन चिन्तितम् वित्तं तु सर्वं मे हस्तगतं भवति इदानीं । तत्केन प्रकारेण मदीयमेव भूयात् इत्युपायो विधेयः । इति सञ्चिन्त्य कियद्दूरमग्रे गत्वाऽचिन्तयत् अहो एषा सुजला सरस्वती वहति । एतस्यां गर्तं खनित्वा वसुना (८) प्रपूर्य गच्छामि समये प्राप्ते पुनरागत्य लप्स्यामि । निजप्रत्ययार्थं किञ्चित्किञ्चित्तेषां गृहे दास्यामि। यतोजनाः न निन्देयुः । तेन तथा कृतं । गर्ते धनं धृत्वा मृत्तिकया आच्छादितम् । किञ्चित्किञ्चित्तत्पित्रे दत्तम् ॥

कुमित्रे नहि विश्वसेत् (१)

—*—

राजबालकयोः

१ कनिष्ठः लघुभ्राता । २ तदनन्तरम् अवसरम् ।

अथैकस्मिन्नपत्तने हिमांशुर्नाम राजा प्रतिवसतिस्म। तस्य पुत्रद्वयम् आसीत्।एकः सुधांशुनामा द्वितीयश्चन्द्रांशुरिति । तौ च एकदा परस्परं क्रीडन्तौ नदीतीरं गतौ तत्र गत्वा ताभ्यां किं दृष्टम् । एकः सिंहः प्रसारितकेशरः उद्धृतस्कन्धो बुभुक्षित इव सघने वनेविचरति । अकस्मात् तं विलोक्य विभ्रान्तलोचनौ अभूताम् । कनिष्ठ(१)श्चन्द्रांशुः प्रोवाच । भोः सुधांशो ! कथमस्मात् प्राणत्राणं कुर्व्वः । आवां तु बालौ अज्ञातधनुर्विद्यौ अपरं च राजकुलोत्पन्नत्वात् सुकुमारौ। यदि अयं स्वयमेव आवाम् अदृष्ट्वैव यायात् तदा आवयोः प्राणरक्षा भवेत्। नान्यथा। एवं चिन्तयतोस्तयोर् एकोहस्ती समायातः । हस्तिसिंहयोः परस्परं युद्धमभूत् । तौ च तयोर्युद्धे बलाऽवलदर्शनोत्सुकचित्तौ तत्रैव स्थितौ । तयोर्बालकयोः पश्यतोः सिंहेन हस्ती मर्द्दितः। तद्दृष्ट्वा सुधांशुः प्रोवाच। भोश्चन्द्रांशो! पश्य। हस्तिनस्तृतीयभागवपुषा सिंहेन एतादृशः स्थूलतरोहस्ती मर्दितः। तदित्थं ज्ञातं मया। यल्लघुत-

रोऽपि जीवः स्यात् परं गुणबुद्धियुतः स्यात् तदा न्यून-प्रयासेनैव परदमनकर्ता भवति। अतो भद्र! आवामपि ल-घुतरौ गुणबुद्धिहीनौ राजकुमारौ स्वः। तदन्तरं (२) लब्ध्वा पितरं वृद्धं च विज्ञाय कश्चित् रिपुरावयोः राज्यं बलादा-हरिष्यति। तद् भ्रातः! यदि तस्योपायं अद्यैव करिष्याव-स्तदैव सुखेन राज्यं भोक्ष्यावः। बाल्याऽवस्थासंचिता ए-व विद्या सुखदा भवति। इत्थं मिथो विचिन्त्य गृहमाजग्म-तुः। आगत्य च एकः पण्डितः स्वपठनार्थं रक्षितः। त-स्मात् तौ व्याकरणमारभ्य न्यायान्तानि शास्त्राणि अधी-तवन्तौ। अतएवोक्तं लोके दृष्टान्तः। " सहायास्तादृशाः सर्वे यादृशी भवितव्यता " ॥

कुक्कुरशृगालयोः

१ पललं मांसम्।	७ पुराणवैरी प्राचीनशत्रुः।
२ अन्वधावत् अन्वगच्छत्।	८ परुषवचः दुर्वचनम्।
३ शृगालवृन्दः शृगालसमूहः।	९ पौरुषेण बलेन।
४ सारमेयः श्वा।	१० वाचि शब्दे।
५ भीषणारवं भयंकरशब्दम्।	११ उपहारः बलिः।
६ तीक्ष्णदशन तीव्रदन्त।	

कस्मिंश्चिदधिष्ठाने केनचिदेकः कुक्कुरः पालितः। तस्य कुक्कुरस्य मांसभक्षणस्य व्यसनं पतितम्। तस्य स्वामिनः पललं (१) दुर्लभम् आसीत्। तदर्थं स वनं गत्वा कञ्चिज्जीवं व्यापाद्य स्वोदरपूरणं विधाय स्वामिद्वारमागमिष्यत्। एकस्मिन्दिने स कुक्कुरः वनं गत्वा कस्यचित् कृषिकारस्य अर्द्धपक्वयवक्षेत्रे कस्यचिज्जीवस्य मारणार्थम् अन्वधावत् (२) तदैव एकः शृगालवृन्दः (३) समायातः। तेन च सः श्वा समन्तादवरोधितः। उवाच च। भोः सारमेय! (४) शृणु यदस्माकं नगरे गतानां पश्चात् त्वं जनेभ्योऽस्मदागमनं निवेदयन् भीषणरवं (५) कुर्वन्नूधावतिस्म। तस्य प्रतीकारमधुना प्राप्स्यामः। तीक्ष्णदशन (६) धाराभिश्च विदारयिष्यामः। अस्थिमात्रस्याऽपि चर्वणं करिष्यामः। यत् त्वं अस्मत्पुराणवैरी (७)। तत् क्रियतां निजप्राणरक्षाया उपायः। स कुक्कुरः तेषामेवं परुषवचः श्रुत्वा निजपुच्छं चालयन् अशोचत्। हन्त कथमेभ्यः जीवरक्षां करिष्यामि। यतः इमे बहुतराः, अहम् एकएवाऽस्मि। तद् इदानीं सर्वेषां जम्बुकानामग्रे मया प्रणतिर्विधेया। इत्थम् अवधार्य सः श्वा सविनयंप्रोवाच। भोभ्रातरः! अहं

युष्माकं लघुभ्राता शिष्यश्च। अस्य वाक्यस्य समस्तव्यवस्थाबोधकं वृत्तान्तं निबोधत। भोः कस्यचिच्छृगालराजस्य मम माता युष्माकं च माता द्वे कन्ये आस्ताम्। एकस्मिन्दिने मम मातुर्युष्माकं च मातुः कस्मिंश्चिद्विषये विरोधः सञ्जातः। युष्मन्मात्रा निजशरीरपौरुषेण (९) मम माता नगरे पलायिता। तावदारभ्य एतत्कालपर्यन्तं युष्मन्मातुर्भयेन वनं नाऽगच्छत्। अतो यूयं निर्भयाःवने पर्यटथ। अहं सभयो नगरे विचरामि। अनेन भ्राता अहं युष्माकम्। भवतां मम च वाचि (१०) कोऽपि न भेदः। यूयं गानकुशलाः शिक्षितस्वरा इव ब्रूथ। अहं वाक्त्रुटिं विधाय अशिक्षित इव ब्रवीमि परं वागेकैव। अधुना युष्मत्सकाशात् गानस्वरशिक्षां ग्रहीतुं समागतोऽहम्। परं तु निर्विघ्नतया स्वरशिक्षासमाप्त्यर्थं मङ्गलमयं वस्तु किमपि न आनीतम्। यद्गुरोरग्रे निवेद्य शिक्षारम्भं करिष्यामि। तद्विचार्य शशकोऽयं भवतामुपहार (११) प्रदानाय यवक्षेत्रे ते च मारितः। शुना इत्थं कथयित्वा ते वञ्चिताः। तेच तद्वचनं श्रुत्वा कोगुरुर्भविष्यति अस्य इति विचेरुः। तदन्तरेणैव अहं गुरुर्भवामि अहं गुरुर्भ-

वामि इति विषये तेषु परस्परं विरोधोऽभवत् । श्वा उवाच। भो न युद्ध्यत यूयम्। अहम् एकं न्यायं जानामि। यथान्यायं करिष्यामि च । ते ऊचुः । भो यदि यथान्यायं करिष्यति भवान् तदा क्रियतां न्यायः। कस्ते गुरुर्भवितुं योग्योऽस्ति । तेन कथितं भो अहं स्वेच्छया कञ्चिदेव गुरुं करिष्यामि । यूयं मा युद्धं कुरुत । इति कथयित्वा तेन शुना यूथाऽधिपोवृद्धः शृगालोगुरुः कृतः । तेनैव सार्द्धं मैत्री च कृता । स च निमित्तमात्रं गुरुं विधाय स्वामिद्वारमाजगाम ॥

स्वकार्यं साधयेद्धीमान् कार्यभ्रंशोहि मूर्खता।

अथैकस्मिन्दिने पुनः सपललादनचित्तः कुक्कुरो वनं जगाम। दैववशात् स पुराकृतगुरुः शृगालयूथाऽधिपोऽपि तत्र मिलितः। तेनोक्तं भोः शिष्य ! एतावत्कालपर्यन्तम् अनध्यायः कथं कृतः । यतः पठनार्थं नागतः । शुना विचारितं, यदि अस्य विरोधिवचनं वदिष्यामि तदा तु अयं हूहू इति एवं कृत्वा सजातीयानाहूय मच्छरीरविद्रावणम् अवश्यमेव कारयिष्यति। इति निश्चित्य अवदत्। भोगुरो! मम स्वामिना गले रज्जुं बद्ध्वा रक्षितोऽहम् । त-

दनध्ययनकारणं भवति। तत् क्षन्तव्यं भवता। आगम्यताम् अद्य तु कञ्चिज्जीवं व्यापाद्य भक्षयावः। पुनरध्ययनं करिष्यामि। तेनोक्तं सुकथितं भवता अद्य मयाऽपि प्रातरारभ्य अनशनमिव कृतम्। चल तर्हि दर्शय कञ्चित्क्षुद्र जन्तुम्। येनाऽवयोः सम्यक्प्राणयात्रा भवितुमर्हति। इति मिथो मन्त्रयित्वा कञ्चिज्जीवमन्वेषणार्थमुभिचरितवन्तौ। तत्र विचरद्भ्यां ताभ्याम् एको मृगशावः सुघासम् अदन् दृष्टः। तं विलोक्य शृगाल उवाच। पश्य भोः-प्रसन्नीभूतेन देवेन आवयोर्भक्ष्यार्थम् एकोमृगबालः प्रेषितः। सुतृणविभूषिते क्षेत्रे अकुतोभयो विचरति। तर्हि तस्य निकटे तथा गन्तव्यं यथा स न जानातु। अन्यथा पलायमानोऽयम् आवाभ्यां ग्रहीतुमशक्यो भविष्यति। स्वयूथे मिलिष्यति च। तत् सावधानीभूतेन त्वया एषः परथा रक्षणीयः मया च द्वितीयः। ताभ्यां तथैव कृत्वा मृगबालो यूथविगलितः दर्शनसुन्दरः अपरतश्च यथार्थ पलायनक्रियायाअनभिज्ञः तीक्ष्णधाराभिर्दंष्ट्राभिर्गृहीतो विदारितश्च॥

एकस्मिन् लिप्यमानो हि सर्वतोदृष्टिमाहरन्
अजानन् पीतमदवन्मृगात्मा इव नश्यति १

—*—

द्विजसुतवियोगिन्योः

१ प्रादुर्भूतः उत्पन्नितः । ६ आविर्भूतम् निष्कलितम्
२ न्यस्तकुम्भा धृतघटा । ७ भास्करतेजोहतलता ।
३ समाययौ आजगाम । सूर्यतेजसा मूर्छिता लता
४ चिबुकः अधरोष्ठान्निम्न- ८ सा चोरीचकार ।
भागः । सा अङ्गीकृतवती ।
५ भालपट्टे मस्तके ।

एकस्मिन्नगरे धनंजयशर्म्मा नाम ब्राह्मण आसीत् । तस्य वृद्धाऽवस्थायाम् एकः सुतः प्रादुर्भूतः (१) । धनंजयशर्म्मा तस्य पुत्रस्य इन्द्रदत्त इति नाम चकार । तमतिमोहेन पालयामास च । स लघुकालेनैव विद्याऽध्ययनयोग्यो जातः । धनंजयशर्म्मणा पठनार्थम् काश्याम् प्रेषितः । स च काशीं गतः । गत्वा च शास्त्राऽध्ययने लग्नः बहूनि शास्त्राणि अवलोकितानि अधीतानि च तेन । क्षिप्रकालेनैव विद्या उपार्जिता तेन । स एकदा स्ववयस्यै-

श्छात्रैः सार्द्धम् भागीरथ्याम् स्नानार्थम् गतः। अन्ये तत्सहचारिणः शीघ्रम् स्नात्वा पाठशालायाम् समागताः। स तत्रैव तटे स्थित्वा सन्ध्योपासनादिकं कर्म्म अकरोत्। एतदन्तरेणैव काचिद् बाला नवयौवना मस्तके न्यस्तकुम्भा (२) कटीं कुटिलयन्ती, निजचञ्चलनयनैर् इतस्ततोजनान् मूर्छयन्ती, गत्या च हंसमपि निन्दन्ती, कान्त्या च चन्द्रम् हसन्ती, समाययौ (३)। तयाऽपि घटे उदकपूरणं तु विस्मृतम् उत विबुककृतहस्ता काञ्चित्प्रियवार्तां शोचितवती। अहो विधिना कान्तवियोगो मम भालपट्टे लिखितः। यदद्य ऋतुराजे वसन्तसमये पत्युः पृथक् कृता दुःखम् भजामि। हन्त मे दयितो निर्दयोऽस्ति। यत् तेन त्यात्वैवाहम् पृथक् कृताऽस्मि। अद्य मां क्षणमपि वर्ष इव याति। मम पातिव्रतधर्म्मपालने ईश्वरः सहायो भविष्यति न वा। तदधुना इन्धनसञ्चयम् कृत्वा, चितां प्रज्वाल्य शरीरम् दहामि। एवं शोचन्त्यास्तस्याः मुखात् हठात् रोदनम् आविर्भूतं (६) स च रोदनशब्दः इन्द्रदत्तस्य कर्णौ गतः। इन्द्रदत्तोऽपि अकस्मात् तम् शब्दम् श्रुत्वा विभ्रान्तनयनोऽभूत्। तस्याश्च समीपम् जगाम।

गत्वा च इन्द्रदत्तेन सा पृष्टा। भो वाले! का त्वम् कस्य सुवंशे जाता कस्य कुलोद्धारिणी सुवधूः। यदद्य गङ्गातीरे भास्करतेजो(७) हतलता इव कान्तवियोगिनी इव चिबुकम् करे धृत्वा शोचसि मूर्छसि च। तदद्य मां प्रति स्वदुःखकारणम् वद। यत्किञ्चिन्मत्तस् ते दुःखनिवर्तनम् भविष्यति तत्करिष्यामि। तद्दुःखम् त्यक्त्वा कारणम् श्रावय। यत् तस्योपायम् शीघ्रम् विदधामि। सा इन्द्रदत्तस्य तां वाणीं श्रुत्वा अश्रुप्रवाहैर् धरातलं सिञ्चन्ती वस्त्रेण नयनयोर्जलम् अपवारयन्ती किञ्चित्किञ्चिद् रुदन्ती ववाद भो द्विजवंशभूषण! कस्त्वम् कुतः समायातः किम् ममोपरि दयां कर्तुकामः समागतः। भगवन्! यथा भवांस्त्यक्तभार्यो वसन्तसमये विरहिणि दुःखजनके अत्र काश्याम् निश्चिन्तो दिनानि गमयति। प्रिय! तथैव मे भर्त्ताऽपि गृहाद् रुष्ट्वा परदेशम् गतः। न जाने स क्व वसन्तसमयम् यापयति। मां च एकाकिनीं पतिवियोगिनीम् विरहकर्षिताम् अबलां दृष्ट्वा ऋतुराजः प्रहरति। अतोऽहं गङ्गातीरमासाद्य प्रियवार्त्ताम् चिन्तयन्ती दिनानि

गमयामि। एतद्दुस्तरकालस्य अपनयाय उपायम् शोचामि येनाऽयम् समयः सुखं गच्छतु। यदि एतस्य मम दुःखवारणस्य उपायम् जानासि तर्हि दयां कृत्वा कथय। अहं त्वत्त एव कृतकृत्या भविष्यामि। इन्द्रदत्तोऽपृच्छत्। भोः सुमुखि! कीदृग्वपुर्वर्णबलोपेतस्ते कान्तः। यत् चिन्हम् अनुभय तमन्वेषणार्थम् गच्छामि। तच्छ्रुत्वा सा प्रफुल्लित-मुखपङ्कजा इन्द्रदत्ताय आशिषो ददौ। तेनोक्तं भोः तव भर्तुर्विरोधकारणं किं कस्माद् रुष्टस् त्वत्तो वा अन्यस्मात्। तया कथितं भो मत्तः। त्वत्तः कथम्। भो एकस्मिन्दिवसे तस्य आज्ञा मया न पालिता। इन्द्रदत्त उवाच—अतःपुनरागमिष्यति यदि तदा न तस्माद्द्वेषः कार्यः सा चोरीकार (८)

सन्तुष्टोभार्यया भर्त्ता भर्त्रा भार्या तथैव च।
यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम्।

मनुः ॥१॥

—※—

ब्राह्मणक्षत्रिययोः

१ आवेदनीयम् कथनीयम् । ४ समयानुकूलं शीतोष्णा-
२ समाधाय सावधानं कृत्वा । षधीनां विचारं कृत्वेति ।
३ अकूलस्य करीलस्य ।

अथ कस्मिंश्चिदधिष्ठाने कुवेरदत्तनामा ब्राह्मणो बभूव । स प्रतिदिनं ब्राह्मे मुहूर्ते निशाऽवसाने उत्थाय स्वेष्टदेवतामारराध । एवं गच्छति काले तत्रैव कदाचित् कश्चिन्मदनपालनामा क्षत्रियः समायातः । तेन उक्तं, भो ब्राह्मण! अस्मिन् सशीते माघमासे तदपि रात्रिशेषे प्रातः कालउत्थाय किमर्थम् एतादृशं क्लेशं सहसे ! तद् यदि किञ्चित्सुखदायकम् एतत् क्लेशसहनं स्यात् तर्हि मह्यमप्यावेदनीयम् (१)। अहमपि विधास्यामि । इति श्रोत्रीकृत्य कुवेरदत्तोऽवदत् । भोः क्षत्रियकुलदीपक ! अहं समग्रां दिनचर्य्यां करोमि । मदनोऽवदत् । भोः का नाम दिनचर्य्या । कुवेरदत्तोऽकथयत् । भोः प्रातरारभ्य सायंकालान्तं मनुष्येण किं करणीयं सायमारभ्य प्रभातान्तं किं विधेयमिति नाम दिनचर्या । मदनपालउवाच। भोः किं फलं तस्याः करणे न किञ्च विपरीतेन । कुवेरद-

त्तो जजल्प। भोः शरीरे आरोग्यं बुद्धौ निर्म्मलत्वं मनसि अचाञ्चल्यं च तस्याः करणेन संजायते। एतद्विपरीतं न करणेन। मदनपाल उवाच। भोः कदाचित् २ कार्या इयं सर्वदा वा इति वक्तव्यम्। कुवेरदत्त आह। भोः सर्वदा। मदनपालउवाच। भो यद्येवं सुफलदा सा तदा मह्यमपि वाच्या। प्रातरारभ्य सायान्तं किं किमनुष्ठेयम्। कुवेर दत्त आह। शृणु भो मनः समाधाय (२)। सुश्रुते—उत्थायोत्थाय सततं स्वस्थेनारोग्यमिच्छता। धीमता यदनुष्ठेयं तत्सर्वं संप्रवक्ष्यहम् ॥१॥ प्रथमं तु प्रातःकाले उत्थाय खट्वास्थ एव परमेश्वरस्य स्मरणं कुर्य्यात् स्वेष्टदेवस्य वा। तदनु जीवितमातृपितृणाम् अभिवादनं च कुर्य्यात्। तदनु विट् त्याज्यः। तदनु मृत्तिकया सप्तवारं दशवारं वा यथा शुद्धमलिः हस्तौ प्रक्षाल्य पादावेकवारं च। तदनन्तरं दन्तधावनार्थं यतेत। तत्प्रमाणेन द्वादशांगुलं स्यात् प्रायोऽक्ष्वृक्षस्य च (३)। तच्चगलतात्वोष्ठजिह्वामुखपाकश्वासश्वासहिक्कावद्भिर्वर्जनीयम्। एतत्करणेन दन्तादिषु आरोग्यं भवति। मुखस्य दौर्गन्ध्यहीनं जायते अन्नाभिरुचिश्च वर्द्धते। तत्पश्चाच्छीतलजलेन मुखधावनं कार्य्यम्। चक्षुस्तेजःप्रवर्द्धनाय नयनयोरञ्जनं च देयात्। तदनु स-

यथाऽनुकूलम् (४) ओषधिसंमिलितैः निरौषधीभूतैर्वा तैलैः सशिरोंऽगाभ्यङ्गः कार्यः । जलसिक्तस्य वर्द्धन्ते यथा मूलें-ऽङ्कुरास्तरोः ॥ तथा धातुविवृद्धिर्हि स्नेहसिक्तस्य जायते ॥१॥ तत्पश्चात् यथाशरीरबलेन व्यायामो विधेयः । श्लोकाः । न च व्यायामिनं मर्त्यमर्द्दयन्त्यरयो भयात् । न चैनं सहसाक्रम्य जरा समधिरोहति ॥१॥ स्थिरीभवति मांसञ्च व्यायामाऽभिरतस्य च ॥ व्याधयो नोपसर्पन्ति सिंहं क्षुद्र-मृगा इव ॥२॥ वयोरूपगुणैर्हीनमपि कुर्यात्सुदर्शनम् ॥ विदग्धमविदग्धं वा भोजनं तस्य पच्यते ॥३॥ व्यायामो हि सदा पथ्यो बलिनां स्निग्धभोजिनाम् ॥ स च शीते वसन्ते च तेषां पथ्यतमः स्मृतः ॥४॥ भो प्रिय !एवं बहुगुणो व्यायामः। परन्तु अतिव्यायामं नाचरेत् । तदनु व्यायामोत्थितपवनं स्थिरीकृत्य कञ्चित्कालं स्थित्वा शीतसमये उष्णेन उष्णे च शीतेन स्वप्रकृतिसात्म्येन वा पानीयेन स्नायात् । तच्च स्नानं आयुः कीर्तिप्रीत्योजोबलवर्द्धनम् । तच्च स्नानम् अतीसारज्वरितकर्णशूलआध्मानाऽरोचकाजीर्णभुक्तवत्सु गर्हितम् भवति । न तैः करणीयमिति । येषां स्नानस्य निषेध उक्तः तेषां चन्दनस्याऽपि ।

तदनु आहारो विधेयः । आहारः प्रीणनः सद्योबलकृद्देह-धारकः ॥ आयुस्तेजः समुत्साहस्मृत्योजोऽग्निविवर्द्धनः ॥१॥ भुक्त्वा च पादप्रक्षालनं कुर्वीत । अग्रे सद्विचारजनी-कर्म समासतः कथयामि । स्वप्न जागरण शयनाऽशन स्थान चंक्रमण यान वाहन प्रधावन लङ्घन प्लवन प्रतरण हास्य भाष्य व्यवाय व्यायामादीन् उचितान् अपि अति न सेवेत ॥

—*—

शङ्खपोड़शङ्खयोः

कस्मिंश्चित्पत्तने कश्चिदीश्वरदत्तशर्मा ब्राह्मण आसीत् तस्य कदाचित् स्वभार्यया साकं विरोधः आसीत् । स तस्या रुष्ट्वा परदेशं गतः । तत्र गत्वा तेन तपस्तप्तम् । तत्र ईश्वरवरप्रसादात् एकः शंखोलब्धः । स च मनोऽभिलाषपूर्त्तिकरणगुणविशिष्टः आसीत् । ब्राह्मणस्तं गृहीत्वा गृहमागन्तुकामो मार्गे स्वयजमानस्य गृहे रात्रि-मात्रां वसतिं चकार । तेन यजमानेन शङ्खान्मनोऽभिलाष-मभिलषन् ब्राह्मणः श्रुतः । यजमानो विचचार । अहो श-ङ्खोऽयं मनोऽभिलाषं पूरयति । तदा चोरयितव्योऽयं शङ्खः ।

मदीया निर्धनता दूरीभविष्यति । इति विचार्य अवस्थितः । ब्राह्मणो यदा भोजनं कर्तुमारेभे पश्चाद्यजमानेन शङ्खश्चोरितः । द्वितीयो धृतस्तत्रैव । ब्राह्मणस्तमेव जानन् स्वभवनमाजगाम । गृहे आगत्य अर्थितः शङ्खः किमपि न ददातिस्म । तदा तेन विप्रेण विचारितम् अहो प्रतिनिधिः शङ्खोऽयं समर्पितो मम यजमानेन । स तेन छद्मनाऽपहृतः । तत्केन उपायेन प्राप्स्यति । स विधेयः । इति संचिन्त्य पुनस्तत्रैव वने तपस्तप्तुम् आपेदे । पुनरीश्वरेण लपोड्शङ्खनामा शङ्खो दत्तस्तस्मै । स तं शङ्खं लब्ध्वा पुनस्तत्रैव यजमानस्य गृहे आगत्य स्थानं कृतवान् । पुनर्ब्राह्मणेन शङ्खोऽभ्यर्थितः । शङ्खः सहस्रं शतं ददामि इति ब्रुवन् असौ यजमानेन । मनसि अशोचत् । अहो अयं ततोऽपिवरिष्ठः । यत् सहस्रं शतं वा ददाति । स तु मुद्रापञ्चकमेवाऽददात् । तर्हि पञ्चमुद्रादायकम् अस्यैव पोट्टल्यां धृत्वा, सहस्रशतदायकं हरिष्यामि । एवमुद्दिश्य पूर्वचोरितः शङ्खो धृतः द्वितीयश्चोरितः । ब्राह्मणस्तं लब्ध्वा स्वगृहमाजगाम पश्चाद् यजमानेन शङ्खाद् अभ्यर्थितम् । शङ्खोऽवदत् गृहाण मुद्रासहस्रं शतकं वा यावती इच्छा भवेत्तावती । ववाद

एव केवलम् । परं ददाति किमपि न स्म । यजमानो वव्रे, भोः केवलं वदति एव ददाति किमर्थम् न । शङ्खो जजल्प । भोः—

अहं ददामि वाङ्मात्रं न च प्रत्ययकारकम् ॥
सत्यं लपोड़शङ्खोऽस्मि न ददाम्याहरामि न॥१।

—*—

कथानां सूची